# S S L C Model Examination 2022

## SANSKRIT ( SET 2 )

TIME 1:30 hrs　　　　　　SCORE :40

**निर्देशा:** -

1. 20 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।

2. प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।

3. प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।

4. 1 - 24 प्रश्नेभ्यः परमतः 40 अङ्काः कल्पिताः ।

## I . प्रश्नानां प्रत्येकम् एकैकः अङ्कः ।

### भागः 1. ( 1 - 6 ) चतुर्णां समुचितम् उत्तरं कोष्ठकात् चित्वा लिखत । ( 4X1=4)

1. फलपाकान्ता का?

   ( वृक्षः ,ओषधिः,वीरुत् )

2 . एति इत्यस्य लकारः कः ?

   ( लङ्, लोट्, लट्)

3. दीनवत्सला जननी इति कथा कस्मात् ग्रन्थात् स्वीकृता ?

   ( महाभारतात्, रामायणात्, पञ्चतन्त्रात्)

4. ऋते शब्दयोगे का विभक्तिः ?

   ( द्वितीया, तृतीया, पञ्चमी)

5. " स्वराज्यम् अस्माकं जन्माधिकारः एव" कस्य वचनमिदम्?

   ( महात्मागान्धिनः, डा. एस्. राधाकृष्णस्य, बालगङ्गाधरतिलकस्य )

6. सङ्गीतविद्यायाः अपरनाम किम् ?

   ( जालविद्या, गीतविद्याा, गान्धर्वविद्या )

**भागः 2. ( 7- 9 ) प्रश्नानां प्रत्येकं एकैकः अङ्कः ।** **( 3X1=3)**

7. येशुदेवः पर्वतोपरि स्थित्वा कृतस्य उपदेशस्य नाम किम् ?

( स्नेहप्रभाषणम्, देवप्रभाषणम्, गिरिप्रभाषणम् )

8. कुमारसम्भवस्य कर्ता कः ?

( भारविः, श्रीहर्षः, कालिदासः )

9. काव्येषु रम्यं किम् ?

( पद्यम्, गद्यम्, नाटकम् )

**II . प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।** **( 1X2=2)**

**भागः 1.**

**10. उदाहरणानुसारं यद्यपि - तथापि उपयुज्य वाक्यं परिवर्तयत ।**

उदा - मातुः बहवः पुत्राः सन्ति ।

दीने पुत्रे कृपार्द्रहृदया अस्ति ।

**यद्यपि** मातुः बहवः पुत्राः सन्ति **तथापि** दीने पुत्रे कृपार्द्रहृदया अस्ति ।

राजुः यथासमयम् बस्निस्थानं गतः ।

बस्यानं न अलभत ।

**भागः 2. ( 11- 12) प्रश्नानां प्रत्येकं द्वौ अङ्कौ । एकस्य उत्तरं लिखत । ( 1X2=2)**

**11. सूचनानुसारं गद्यक्रमं लिखतु ।**

यूयं स्वधर्माचरणं परेषा -
मालोकनार्थं जनतासमक्षम्
मा कार्ष्ट नाकस्थपितुर्न लभ्यो
यद्येवमुत्तुङ्गकृपाप्रसादः ।। १

यूयं . . . . . . . . . . . . . परेषाम् आलोकनार्थं. . . . . . . . . मा . . . . . . । एवं यदि नाकस्थपितुः. . . . . . . . . न लभ्यः ।

**12. सुभाषितं पठित्वा अधोदत्तेभ्यः उचितं आशयं चित्वा लिखत ।**

इमामहं वेद न तावकीं धियं

विचित्ररूपा खलु चित्तवृत्तयः ।

विचिन्तयन्त्या भवदापदं परां

रुजन्ति चेतः प्रसभं ममाधयः ।।

i. तस्याःअवसन्नभुजात् गलद् वलयं अवनिं यातं न विवेद ।

ii. पाण्डवानां व्यसनं चिन्तयन्त्याः द्रौपद्याः मनः आधयः अतितरां तापयन्ति ।

iii. अपरिचितैः पुरुषैः सह भाषणं उचितं न भवति ।

**III. ( 13- 16) प्रश्नानां प्रत्येकं त्रयः अङ्काः । त्रयाणाम् उत्तरं लिखत । ( 3X3=9)**

**भागः 1.**

**13. i. उदाहरणानुसारं पदच्छेदं लिखत ।**

सर्वेषु+ अपत्येषु - सर्वेष्वपत्येषु ।( एवं चेत्)

तेषु + अपि - . . . . . . . . . . . ।

**ii. उदाहरणानुसारं विग्रहं लिखत ।**

गुरुमहिमा - गुरोः महिमा । ( एवं चेत्)

तरुमहिमा - . . . . . . . . . . ।

**iii. अधोदत्तवाक्यात् सम्बोधनापदं चित्वा लिखत ।**

" अयि शुभे ! किमेवं रोदिषि ? "

**14. उदाहरणानुसारं श्रीशङ्कराचार्येण रचिताः ग्रन्थाः पट्टिकारूपेण परिवर्तयत ।**

( सौन्दर्यलहरी, ब्रह्मसूत्रम् ,विवेकचूडामणिः)

| भाष्यम् | प्रकरणम् | स्तोत्रम् |
|---|---|---|
| भगवद्गीता | उपदेशसाहस्त्री | भज गोविन्दम् |
| ..........................<br>. | ................................... | ................................... |

**15. समानार्थकपदानि चित्वा लिखत ।**

कर्षकः -

बलीवर्दः -

वासवः -

| |
|---|
| वृषभः , आखण्डलः , कृषीवलः |

**16. यथोचितम् पट्टिकां पूरयत**

| कृतीनां नाम | कर्ता |
|---|---|
| सत्यशोधनम् | . . . . . . . . . . . . . . |
| . . . . . . . . . . . . . . | बालगङ्गाधरतिलकः |
| वेदान्तस्य धार्मिकता | ........................... |

**भागः 2. प्रश्नानां प्रत्येकं त्रयः अङ्काः ।** (1X3=3)

**17. यथोचितं योजयत ।**

ज्ञात्वा - ल्यबन्तमव्ययम्

पुरस्कृत्य - तुमुन्नन्तमव्ययम्

वक्तुं - क्त्वान्तमव्ययम्

**IV . ( 18- 20) प्रश्नानां प्रत्येकं चत्वारः अङ्काः । प्रश्नेभ्यः द्वयोः उत्तरं लिखत ।**

**भागः 1.** (2X4=8)

**18. श्लोकं पठित्वा प्रश्नानां उत्तराणि लिखत ।**

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये ।।

i. भूगतौ अश्विनीसुतौ कौ ?

ii. अहं कं न समाश्रये ?

iii. नैवाहम् इति पदस्य पदच्छेदः कः ?

iv. अस्मिन् श्लोके क्रियापदं किम् ?

**19. सम्भाषणांशान् पूरयत ।**

श्रीशङ्करः - भवति! भिक्षां देहि ।

ब्राह्मणपत्नी - वत्स! . . . . . . आगतवान् ?

श्रीशङ्करः - मातः! अहं समीपस्थात् गुरुकुलात् आगतवान् ।

ब्राह्मणपत्नी - पुत्र! . . . . . . . आगतोऽसि ?

श्रीशङ्करः - भिक्षार्थम् आगतवान् ।

ब्राह्मणपत्नी - वत्स! अत्र केवलमेकं. . . . . . . . . . . एव अस्ति ।

श्रीशङ्करः - आमलकम् ? समीचीनम्, कृपया ददातु ।

ब्राह्मणपत्नी - पुत्र ! . . . . . . . . . . . . ।

श्रीशङ्करः - ( स्वीकृत्य) मातः । भवत्याः दारिद्र्यनिवृत्तये अहं प्रार्थयामि ।

**20. वृक्षः, वनस्पतिः, वीरुत्, ओषधिः इति क्रमेण सस्यानां पट्टिकां करोतु ।**

कदली, पनसः, द्राक्षा, पूगः, अश्वत्थः, आम्रः, गोधूमः, कूश्माण्डः ।

**भागः 2. ( 21- 22) प्रश्नानां प्रत्येकं चत्वारः अङ्काः । प्रश्नेभ्यः एकस्य उत्तरं लिखत । ( 1X4=4)**

**21. खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखत ।**

श्रीहर्षेण विरचितं महाकाव्यं भवति नैषधीयचरितम् । अस्य आशयगम्भीरतया " नैषधं विद्वदौषधम्" इत्युक्तिरप्यस्ति । निषधाधिपतेर्नलस्य वैदर्भ्याः दमयन्त्याः च मिथः अनुरागः पश्चात्तेषां विवाहादयः नैषधीयचरितेऽनुवर्णिताः । एकविंशतिः सर्गास्सन्त्यस्मिन् काव्ये । दमयन्तीं परिणेतुं प्रस्थितं नलमुपागम्य इन्द्राग्निवायुयमवरुणदेवाः दमयन्तीं प्रति तेषामनुरागं प्रकटयन्ति । तथा तेषां वैवाहिकदूतत्वेन नलमेव दमयन्तीसविधं प्रेषयन्ति च ।

i. नैषधीयचरितस्य कर्ता कः ?

ii. नैषधीयचरितम् अधिकृत्य प्रसिद्धा उक्तिः का ?

iii. अस्मिन् काव्ये कति सर्गास्सन्ति ?

iv. खण्डिकात् एकं तुमुन्नन्तमव्ययपदं चित्वा लिखत ?

**22. सूचनानुसारं ईशोपदेशमधिकृत्य टिप्पणीं लिखत ।**

**सूचना -**

( आमुखम् - धर्माचरण् - अन्येषां पुरतः- ईश्वरकृपा- कपटभक्ताः- दक्षिणहस्तेन दानं- गुप्तदर्शी- एकान्ते प्रार्थना - उपसंहारः)

## V. प्रश्नानां प्रत्येकं पञ्च अङ्काः । प्रश्नेभ्यः एकस्य उत्तरं लिखत । ( 1X5=5)

**23. प्रादेशिकभाषायां विवर्तयत ।**

कालान्तरे त्यागराजस्वामिनः कीर्तिः सर्वत्र प्रसारिता । बहवः संङ्गीतप्रणयिनः नादोपासकस्यास्य शिष्यत्वं स्वीकृतवन्तः । तञ्चावूर्देशाधिपः शरभोजी च तस्य महत्वं कर्णाकर्णिकया अशृणोत् । सः त्यागराजस्य मैत्रीमैच्छत् । विज्ञानसम्पन्नोऽपि त्यागराजः निर्धनत्वादतीव क्लेशमनुभवति स्म ।

**24.** मृगयार्थं गतः दुष्यन्तः यदृच्छया कण्वतपोवनं प्रविवेश । तत्र सः शकुन्तलां दृष्ट्वा तस्याम् अनुरक्तो बभूव । तत: तेन दुष्यन्तेन गान्धर्वविधिना सा शकुन्तला परिणीता च । कृत्यान्तरबाहुल्यात् दुष्यन्तः प्रतिनिवृत्तः । तदा प्रभृति तमेव राजानं विचिन्तयन्ती शकुन्तला आश्रमे एव कालमनयत् ।